निन्दितधनादानं १ वाणिज्यं २ शूद्रसेवनं ३ असत्यभाषणं ४ । इति प्रायश्चित्तविवेकः ॥

(“निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं ।
अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं” ॥
इति मनुः ।)

अपादानं, क्ली, (अपादीयते विश्लिष्यतेऽस्मात्, अप + आ + दा + ल्युट् ।) यस्माद्वस्तुनो वस्त्वन्तरस्य चलनं भवति तत् । षट्कारकमध्ये पञ्चमकारकं । तच्चैकादशार्थे पञ्चमी स्यात् यथा । यतोऽपायः । यथा वृक्षात् पर्णं पतति १ । यतो भीः । यथा व्याघ्रात् बिभेति २ । यतो जुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ । यतः पराजयः । यथा सिंहात् पराजयते हस्ती ४ । यतः प्रमादः । यथा धर्म्मात् प्रमाद्यति नीचः ५ । यत आदानं । यथा भूपात् धनमादत्ते विप्रः ६ । यतो भूः । यथा पितुः पुत्रो जायते ७ । यतस्त्राणं । यथा व्याघ्रात् गां रक्षति गोपः ८ । यतो विरामः । यथा जपाद्विरमति विप्रः ९ । यतोऽन्तर्द्धिः । यथा गुरोरन्तर्द्धत्ते शिष्यः १० । यतो वारणं । यथा यवेभ्यो गां वारयति ११ । इति मुग्धबोधटीकायां दुर्गादासः ॥

अपानं, क्ली, (अपनयति मलादि निःसारयति, अप + अन् + णिच् + पचाद्यच् ।) मलद्वारं । तत्पर्य्यायः । गुदं २ । पायुः ३ । इत्यमरः ॥ गुह्यं ४ । गुदवर्त्म ५ । इति जटाधरः ॥ तनुह्रदः ६ । मार्गः ७ । इति शब्दरत्नावली ॥

अपानः, पुं, (अपानिति अधोदेशात् निःसरति, अप + अन् + अच् ।) गुदस्थवायुः । इत्यमरः ॥ अवाग्गमनवान् पाय्वादिस्थानवर्त्ती वायुः । इति वेदान्तसारः ॥

(“अधोनयत्यपानस्तु आहारञ्च नृणामधः ।
मूत्रशुक्रवहो वायुरपान इति कीर्त्त्यते” ॥
इत्युक्तलक्षणोऽवाग्गमनवान् कृकाटिकापृष्ठपार्श्वपायूपस्थवर्त्तिवायुः । गुदस्थवायुः ।)

(“प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ” ।
इति भगवद्गीता ।)

अपापः, त्रि, (नास्ति पापं यस्य सः ।) निष्पापः । पापशून्यः । यथा,—

“इयं दाशरथे सीता सुव्रता ब्रह्मचारिणी ।
अपापा हि त्वया त्यक्ता ममाश्रमसमीपतः” ॥
इति रामायणं ॥

अपामार्गः, पुं, (अपामृज्यते रोगो दूरीक्रियते अनेन, अप + आ + मृज् + करणे घञ् ।) वृक्षविशेषः । आपां इति भाषा । तत्पर्य्यायः । शैखरिकः २ धामार्गवः ३ मयूरकः ४ प्रत्यक्पर्णी ५ कीशपर्णी ६ किणिही ७ खरमञ्जरी ८ । इत्यमरः ॥ शैखरेयः ९ अधामार्गवः १० केशपर्णी ११ इति तट्टीका ॥ अमलमञ्जरी १२ प्रत्यक्पुष्पी १३ क्षारमध्यः १४ अधोघण्टा १५ शिखरी १६ इति रत्नमाला ॥ दुर्ग्रहः १७ अध्वशल्यः १८ काण्डीरकः १९ मर्कटी २० दुरभिग्रहः २१ वाशिरः २२ पराक्पुष्पी २३ कण्टी २४ मर्कटपिप्पली २५ कटुमञ्जरिका २६ अघाटः २७ क्षारकः २८ पाण्डुकण्टकः २९ नालाकण्टः ३० कुब्जः ३१ । अस्य गुणाः । तिक्तत्वं । उष्णत्वं । कटुत्वं । कफार्शःकण्डूदरामयविषरोगनाशित्वं । धारकत्वं । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवर्त्तीक्ष्णत्वं । क्लेदकारित्वं । स्रंसनत्वञ्च । इति राजवल्लभः ॥*॥ तत्फलगुणाः । रसे स्वादुत्वं । पाके दुर्ज्जरत्वं । विष्टम्भित्वं । वायुकारित्वं । रूक्षत्वं । रक्तपित्तप्रसादनत्वञ्च । इति भावप्रकाशः ॥ (अपामार्ग ओषधीनां सर्व्वासामेक इद्वशीति अथर्व्ववेदः ।)

अपाम्पतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्पतिरित्यमरटीकोक्तत्वात् ॥

अपाम्पित्तं, क्ली, (अपां पित्तमिव अलुक्समासः तदुत्पन्नत्वात् ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरटीकोक्तत्वात् ।

अपायः, पुं, (अप + इन् + भावे अच् ।) विश्लेषः । इति रामतर्कवागीशः ॥ चलनं । इति दुर्गादासः ॥ विनाशः । यथा,—

“सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्” । इति काशीखण्डं ॥

अपारं, क्ली, (नास्ति पारं यस्य तत् ।) अवारं । नद्यादेरर्व्वाक्पारं । इति हलायुधः ॥ असीमे त्रि ॥

अपावृतं, त्रि, (अप + आ + वृ + आच्छादने क्तः ।) पिहितं । आवृतं । स्वतन्त्रं । स्वाधीनं । इति मेदिनी ॥ (उद्घाटितं । अनावृतं । अपसारितावरणं ।

“यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं” ।
इति गीता ।)

अपावृत्तं, त्रि, (अप + आ + वृत् + क्तः ।) लुठितं । इति हेमचन्द्रः ॥ लोटा । गड़ागड़ि इति भाषा । (अन्तरितं । परावृत्तं । निवृत्तं ।

“प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचित्” ।
इति महाभारते ।)

अपाश्रयः, पुं, (अपाश्रियते आच्छाद्यतेऽनेन, अप + आ + श्रि + करणे अच् ।) प्राङ्गणावरणं । सामियाना । चाँदोया इति भाषा । तत्पर्य्यायः । मत्तालम्बः २ प्रग्रीवः ३ मत्तवारणः ४ । इति हेमचन्द्रः ॥ आश्रयशून्ये त्रि ॥ (चन्द्रातपः । निराश्रयः । आश्रितः । अधीनः ।

“ब्राह्मणापाश्रयो नित्यमुत्कृष्टां जातिमश्नुते” ।
इति मनुः ।)

अपासङ्गः, पुं, (अप + आ + सन्ज + घञ् ।) उपासङ्गः । तूणः । इत्यमरटीकासारसुन्दरी ॥

अपासनं, क्ली, (अप + अस + भावे ल्युट् ।) मारणं । इत्यमरः ॥

अपास्तं, त्रि, (अप + अस + क्तः ।) निरस्तं । यथा । एतेन नातिसन्ध्यासमीपत इत्यनेन राक्षसीवेलामात्रं निषिध्यते इति मैथिलमतमपास्तं । इति तिथ्यादितत्त्वं ॥

अपाक्षं, त्रि, (अक्षमिन्द्रियमपगतमनुगतमिति यावत्, प्रादिसमासः । अपकृष्टमक्षि चक्षुः कर्म्मधारयः, अच् समासान्तः । अपगतमक्षि चक्षुः कर्म्मधारयः, अच्, समासान्तः ।) प्रत्यक्षं । इति त्रिकाण्डशेषः । कुत्सितचक्षुः । लोचनशून्यं । एतावर्थौ व्युत्पत्तिलभ्यौ ॥

अपि व्य, (न पिबति पिगतौ क्विप्, आगमशास्त्रस्यानित्यत्वान्न तुक् ।) उपसर्गविशेषः । अस्यार्थाः । आहरणं । सम्भावनं । निन्दा । अनुज्ञा । अल्पत्वं । समुच्चयः । इति दुर्गादासः ॥ प्रश्नः । शङ्का । युक्तपदार्थः । कामाचारक्रिया । इति विश्वमेदिन्यौ । (“अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु” इति पाणिनिसूत्रम्) ॥

अपिगीर्णं, त्रि, (अपि + गॄ + कर्म्मणि क्तः ।) स्तुतं । वर्णितं । इत्यमरः ॥

अपिच्छिलः, त्रि, (न पिच्छिलः नञ्समासः ।) पैच्छिल्याभावविशिष्टः । पिच्छिलताशून्यः । यथा ।

“प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलं” ।
इति माधवकरः ॥ (परिष्कृतः । अमलिनः । निर्मलः । गाढ़ः ।)

अपितु व्य, (अपि + तु ।) यद्यर्थं । यद्यपि । इति त्रिकाण्डशेषः ॥

अपिधानं, क्ली, (अपि + धा + भावे ल्युट् ।) आच्छादनं । अन्तर्द्धानं । इत्यमरः ॥ (आवरणं । “द्वारे पुरस्योद्घटितापिधाने” । इति कुमारसम्भवे ।

“शिलापिधाना कालकुतस्य दुर्गं चास्याः प्रवेशनं” ।
इति रामायणे ।)

अपिनद्धं, त्रि, (अपि + नह् + कर्म्मणि क्तः, अस्य वालोपे पिनद्धञ्च ।) परिहितवस्त्रादि । तत्पर्य्यायः । आमुक्तः २ प्रतिमुक्तः ३ पिनद्धः ४ । इत्यमरः ॥

अपीतः, पुं, (पा + कर्म्मणि क्तः । न पीतः, नञ्समासः ।) पीतभिन्नवर्णः । तद्विशिष्टे अकृतपाने च त्रि इति नञ्समस्तपीतशब्दस्यैतावर्थौ ॥

अपीनसं, क्ली, (अपीनाय अस्थूलत्वाय सीयते कल्पते, अपीन + सो + कर्म्मकर्त्तरि कः । पीनसात् रोगविशेषात् भिन्नं नञ्समासः ।) पीनसरोगः । इति रभसः ॥ तद्रहिते त्रि ॥

अपीच्यं, त्रि, अतिसुन्दरं । यथा,—

“अपीच्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतं ।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरं” ॥
इति श्रीभागवतं ॥

अपुच्छा, स्त्री, (नास्ति पुच्छमग्रभागो यस्याः सा, टाप् ।) शिंशपावृक्षः । इति शब्दचन्द्रिका ॥ (त्रि, लाङ्गूलहीनः । शिखरहीनः ।)

अपुनर्भवः, पुं, (न पुनर्भवति न पुनरुत्पद्यतेऽस्मात्, न पुनर् + भू + अपादाने अप्, मयूरव्यंसकादित्वात् समासः ।) मुक्तिः । कैवल्यं । इति हेमचन्द्रः ॥ पुनर्जन्माभावः । यथा,—

“हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे ।
ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः” ॥
इति चरकः ॥ (कर्त्तरि अचि तु पुनर्जन्मशून्यः मुक्त इति यावत् ।)

अपुष्पफलदः, पुं, (अपुष्पं, पुष्पं विना फलं ददाति,